# Shri Chinnamastastotram or Prachandachandikastavarajah

# શ્રીછિન્નમસ્તાસ્તોત્રમ્ અથવા પ્રચણ્ડચણ્ડિકાસ્તવરાજઃ

## Document Information

Text title : shriichhinnamastaastotram

File name : chhinnamastaastotram.itx

Category : devii, dashamahAvidyA, stotra, devI, stavarAja, shankarAchArya

Location : doc_devii

Author : shankarAchArya

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : August 28, 2006, July 27, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીછિન્નમસ્તાસ્તોત્રમ્ અથવા પ્રચણ્ડચણ્ડિકાસ્તવરાજઃ

શ્રીગણેશાય નમઃ ।
આનન્દયિત્રિ પરમેશ્વરિ વેદગર્ભે
માતઃ પુરન્દરપુરાન્તરલબ્ધનેત્રે ।
લક્ષ્મીમશેષજગતાં પરિભાવયન્તઃ
સન્તો ભજન્તિ ભવતીં ધનદેશલબ્ધ્યૈ ॥ ૧॥

લજ્જાનુગાં વિમલવિદ્રુમકાન્તિકાન્તાં
કાન્તાનુરાગરસિકાઃ પરમેશ્વરિ ત્વામ્ ।
યે ભાવયન્તિ મનસા મનુજાસ્ત એતે
સીમન્તિનીભિરનિશં પરિભાવ્યમાનાઃ ॥ ૨॥

માયામયીં નિખિલપાતકકોટિકૂટવિદ્રાવિણીં
ભૃશમસંશયિનો ભજન્તિ ।
ત્વાં પદ્મસુન્દરતનું તરુણારુણાસ્યાં
પાશાઙ્કુશાભયવરાદ્યકરાં વરાસ્ત્રૈઃ ॥ ૩॥

તે તર્કકર્કશધિયઃ શ્રુતિશાસ્ત્રશિલ્પૈશ્છન્દોઽ-
ભિશોભિતમુખાઃ સકલાગમજ્ઞાઃ ।
સર્વજ્ઞલબ્ધવિભવાઃ કુમુદેન્દુવર્ણાં
યે વાગ્ભવે ચ ભવતીં પરિભાવયન્તિ ॥ ૪॥

વજ્રપણુન્નહૃદયા સમયદ્રુહસ્તે
વૈરોચને મદનમન્દિરગાસ્યમાતઃ ।
માયાદ્વયાનુગતવિગ્રહભૂષિતાઽસિ
દિવ્યાસ્ત્રવહ્નિવનિતાનુગતાઽસિ ધન્યે ॥ ૫॥

વૃત્તત્રયાષ્ટદલવહ્નિપુરઃસરસ્ય
માર્તણ્ડમણ્ડલગતાં પરિભાવયન્તિ ।
યે વહ્નિકૂટસદૃશીં મણિપૂરકાન્તસ્તે

કાલકણ્ટકવિડમ્બનચઞ્ચવઃ સ્યુઃ ॥ ૬॥

કાલાગરુભ્રમરચન્દનકુણ્ડગોલ-
ખણ્ડૈરનઙ્ગમદનોદ્ભવમાદનીભિઃ ।
સિન્દૂરકુઙ્કુમપટીરહિમૈર્વિધાય
સન્મણ્ડલં તદુપરીહ યજેન્મૃડાનીમ્ ॥ ૭॥

ચઞ્ચત્તડિન્મિહિરકોટિકરાં વિચેલા-
મુદ્યત્કબન્ધરુધિરાં દ્વિભુજાં ત્રિનેત્રામ્ ।
વામે વિકીર્ણકચશીર્ષકરે પરે તામીડે
પરં પરમકર્ત્રિકયા સમેતામ્ ॥ ૮॥

કામેશ્વરાઙ્ગનિલયાં કલયા
સુધાંશોર્વિભ્રાજમાનહૃદયામપરે સ્મરન્તિ ।
સુપ્તાહિરાજસદૃશીં પરમેશ્વરસ્થાં
ત્વામાદ્રિરાજતનયે ચ સમાનમાનાઃ ॥ ૯॥

લિઙ્ગત્રયોપરિગતામપિ વહ્નિચક્ર-
પીઠાનુગાં સરસિજાસનસન્નિવિષ્ટામ્ ।
સુપ્તાં પ્રબોધ્ય ભવતીં મનુજા
ગુરૂક્તહૂઁકારવાયુવશિભિર્મનસા ભજન્તિ ॥ ૧૦॥ ।

શુભ્રાસિ શાન્તિકકથાસુ તથૈવ પીતા
સ્તમ્ભે રિપોરથ ચ શુભ્રતરાસિ માતઃ ।
ઉચ્ચાટનેઽપ્યસિતકર્મસુકર્મણિ ત્વં
સંસેવ્યસે સ્ફટિકકાન્તિરનન્તચારે ॥ ૧૧॥

ત્વામુત્પલૈર્મધુયુતૈર્મધુનોપનીતૈર્ગવ્યૈઃ
પયોવિલુલિતૈઃ શતમેવ કુણ્ડે ।
સાજ્યૈશ્ચ તોષયતિ યઃ પુરુષસ્ત્રિસન્ધ્યં
ષણ્માસતો ભવતિ શક્રસમો હિ ભૂમૌ ॥ ૧૨॥

જાગ્રત્સ્વપન્નપિ શિવે તવ મન્ત્રરાજમેવં
વિચિન્તયતિ યો મનસા વિધિજ્ઞઃ ।
સંસારસાગરસમૃદ્ધરણે વહિત્રં ચિત્રં
ન ભૂતજનનેઽપિ જગત્સુ પુંસઃ ॥ ૧૩॥

ઇયં વિદ્યા વન્દ્યા હરિહરવિરિઞ્ચિપ્રભૃતિભિઃ
પુરારાતેરન્તઃ પુરમિદમગમ્યં પશુજનૈઃ ।
સુધામન્દાનન્દૈઃ પશુપતિસમાનવ્યસનિભિઃ
સુધાસેવ્યૈઃ સદ્ભિર્ગુરુચરણસંસારચતુરૈઃ ॥ ૧૪॥

કુણ્ડે વા મણ્ડલે વા શુચિરથ મનુના ભાવયત્યેવ મન્ત્રી
સંસ્થાપ્યોચ્ચૈર્જુહોતિ પ્રસવસુફલદૈઃ પદ્મપાલાશકાનામ્ ।
હૈમં ક્ષીરૈસ્તિલૈર્વા સમધુકકુસુમૈર્માલતીબન્ધુજાતીશ્વેતૈરબ્ધં
સકાનામપિ વરસમિધા સમ્પદે સર્વસિદ્ધ્યૈ ॥ ૧૫॥

અન્ધઃ સાજ્યં સમાંસં દધિયુતમથવા યોઽન્વહં યામિનીનાં
મધ્યે દેવ્યૈ દદાતિ પ્રભવતિ ગૃહગા શ્રીરમુષ્યાવખણ્ડા ।
આજ્યં માંસં સરક્તં તિલયુતમથવા તણ્ડુલં પાયસં વા હુત્વા
માંસં ત્રિસન્ધ્યં સ ભવતિ મનુજો ભૂતિભિર્ભૂતનાથઃ ॥ ૧૬॥

ઇદં દેવ્યાઃ સ્તોત્રં પઠતિ મનુજો યસ્ત્રિસમયં
શુચિર્ભૂત્વા વિશ્વે ભવતિ ધનદો વાસવસમઃ ।
વશા ભૂપાઃ કાન્તા નિખિલરિપુહન્તુઃ સુરગણા
ભવન્ત્યુચ્ચૈર્વાચો યદિહ નનુ માસૈસ્ત્રિભિરપિ ॥ ૧૭॥

ઇતિ શ્રીશઙ્કરાચાર્યવિરચિતઃ પ્રચણ્ડચણ્ડિકાસ્તવરાજઃ સમાપ્તઃ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*Shri Chinnamastastotram or Prachandachandikastavarajah*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*